# Shasti Devi Stotram

नमो देव्यै महादेव्यै सिद्धयै शान्त्यै नमो नमः ।
शुभायै देवसेनायै षष्ठीदेव्यै नमो नमः ॥1॥
वरदायै पुत्रदायै धनदायै नमो नमः ।
सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ॥2॥
शक्तेः षष्ठांशरूपायै सिद्धायै च नमो नमः ।
मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः ॥3॥
पारायै पारदायै च षष्ठीदेव्यै नमो नमः ।
सारायै सारदायै च पारायै सर्वकर्मणाम् ॥4॥
बालाधिष्ठातृदेव्यै च षष्ठीदेव्यै नमो नमः ।
कल्याणदायै कल्याण्यै फलदाय च कर्मणाम् ।
प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ॥5॥
पूज्यायै स्कन्दकान्तायै सर्वेषां सर्वकर्मसु ।
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः ॥6॥
शुद्धसत्त्वस्वरुयायै वन्दितायै नृणां सदा ।
हिंसाक्रोधैर्वर्जितायै षष्ठीदेव्यै नमो नमः ॥7॥
धनं देहि प्रियां देहि पुत्रं देहि सुरेश्वरि ।
धर्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः ॥8॥
भूमिं देहि प्रजां देहि देहि विद्यां सुपूजिते ।
कल्याणं च जयं देहि षष्ठीदेव्यै नमो नमः ॥9॥
इति देवीं च संस्तूय लेभे पुत्रं प्रियव्रतः ।
यशस्विनं च राजेन्द्रं षष्ठीदेवीप्रसादतः ॥10॥
षष्ठीस्तोत्रमिदं ब्रह्मन्यः शृणोति च वत्सरम् ।
अपुत्रो लभते पुत्रं वरं सुचिरजीविनम् ॥11॥
वर्षमेकं च या भक्त्या संयतेदं शृणोति च ।
सर्वपापाद्विनिर्मुक्ता महावन्ध्या प्रसूयते ॥12॥
वीरपुत्रं च गुणिनं विद्यावन्तं यशस्विनम् ।
सुचिरायुष्मन्तमेव षष्ठीमातृप्रसादतः ॥13॥

eAstroHelp
Your Astrology Helpline

काकवन्ध्या च या नारी मृतापत्या च या भवेत् ।
वर्षं श्रुत्वा लभेत्पुत्रं षष्ठीदेवी प्रसादतः ॥14॥
रोगयुक्ते च बाले च पिता माता शृणोति च ।
मासं च मुच्यते बालः षष्ठीदेवीप्रसादतः ॥15॥
इति श्री ब्रह्मवैवर्तमहापुराणे प्रकृतिखण्डे
नारदनारायणसंवादे षष्ठीदेवी स्तोत्रं संपूर्णम॥16॥



eAstroHelp
Your Astrology Helpline